International Journal of Sanskrit Research 2021; 7(1): 33-36

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 33-36
© 2021 IJSR
www.anantaajournal.com
Received: 18-11-2020
Accepted: 25-12-2020

**डा. ए. वेङ्कट राधे श्याम**
उपनिदेशकः (सहाचार्यः)
परिशोधन प्रकाशन संकायः
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः
तिरुपतिः, आंध्र प्रदेश, भारत

Corresponding Author:
**डा. ए. वेङ्कट राधे श्याम**
उपनिदेशकः (सहाचार्यः)
परिशोधन प्रकाशन संकायः
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः
तिरुपतिः, आंध्र प्रदेश, भारत

# शब्दार्थ संबन्धः समयः न तु स्वाभाविकः

**डा. ए. वेङ्कट राधे श्याम**

**शोधसारः**

लोकः सर्वोऽपि परम् प्रति अर्थं बोधयितुं शब्दं प्रयुङ्क्ते इति अनुभवसिद्धमेव । शब्दस्य अर्थबोधने सामर्थ्यं अवधारितमेव । शब्दार्थयोः नियतसंबन्धेन विना अर्थबोधनम् न संभवति । स च संबन्धः कीदृशः भवितुं अर्हतीति न्याय मतानुसारेण विचारः पत्रेस्मिन् प्रस्तूयते । मीमांसकाः शब्दार्थयोः संबन्धः स्वाभाविकः इति, शब्दस्य अर्थ बोधनसामर्थ्यं स्वभावः इति च आमनन्ति । नैयायिकास्तु ईश्वर संकेत रूपां शक्तिं पदपदार्थ सम्बन्धतया स्वीकुर्वन्ति । दर्शयन्ति च दोषान् शब्दार्थयोः संबन्धस्य स्वाभाविकत्वे । ते च विचाराः युक्तिप्रधानाः अत्र निरूप्यन्ते ।

**मुख्यशब्दाः**– शब्दार्थ संबन्धः, स्वाभाविकः, शब्दस्य अर्थबोधने सामर्थ्यं अवधारितमेव

## प्रस्तावना

न्यायसूत्रकार: महर्षिः गौतमः, शब्दः न पृथक्प्रमाणं भवितुमर्हति। सः अनुमानविधयैव अर्थप्रत्यायकः भवति। यथा वा प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयते ऽनुमानस्थले, तथैव ज्ञातेन (श्रुतेन) शब्देन पश्चात् अर्थो ज्ञायते यः प्रत्यक्षादिनानवगम्यमानः इति शब्दोऽपि लिङ्गविधयैवार्थबोधकः इति "शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्" [1] इति सूत्रेणाशङ्कितवान्। ततः, यत्र प्रमाणान्तरत्वं = द्वयोः प्रमाणयोः भेदः भवति तत्र प्रमाणयोः अर्थबोधनप्रकारे वैलक्षण्यं दृश्यते यथा प्रत्यक्षानुमानयोः अनुमानोपमानयोश्च। प्रत्यक्षस्थले हि अज्ञायमानात् इन्द्रियात् अर्थज्ञानं भवति, अनुमानस्थले च ज्ञातात् = ज्ञायमानात् लिङ्गात् अर्थज्ञानं भवति।

उपमानस्थले सादृश्यज्ञानार्थप्रतिपत्तिः, नैवमनुमानस्थले इति प्रमाणप्रवृत्तिभेदात् प्रमाणभेदः । शब्दानुमानस्थले तु नैवं प्रवृत्तिभेदोऽस्ति। ज्ञातादेव शब्दादर्थप्रतीतेः, ज्ञातादेव लिङ्गात् अर्थप्रतीतेश्च। अतः शब्दोऽनुमानमेवेत्याशङ्कितवान् – । "उपलब्धेरद्विप्रवृत्तित्वात्' [2] इति सूत्रे।

अपि च सम्बद्धयोः हेतुसाध्ययोर्मध्ये हेतोः दर्शनानन्तरं एकसम्बन्धिज्ञानं अपर सम्बन्धिस्मारकमिति न्यायेन सम्बन्धस्मृतौ सत्यां साध्यप्रमितिर्भवति अनुमानस्थले, तथैव सम्बद्धयोः शब्दार्थयोर्मध्ये शब्दविषयकश्रावणप्रत्यक्षानन्तरं सम्बन्धस्मृतौ सत्यामर्थ प्रतीतिर्भवति शब्दस्थले इति शब्दस्य नानुमानात् पृथक् प्रामाण्यमिति "सम्बन्धाच्च" [3] इति सूत्रेण शङ्का कृता । तत्र समाधानमेवमुक्तम् भवति यत्– “आप्तोपदेशसामर्थ्याच्छब्दार्थसंप्रत्ययः"[4] इति। प्रत्यक्षानवगम्यमानानां स्वर्गः अप्सरसः उत्तराः कुरवः सप्त द्वीपाः समुद्रः लोकसन्निवेशः इत्यादीनामर्थानां न शब्दमात्रात् प्रत्ययःभवेत्। तर्हि अयं शब्दः आप्तैरुक्तः इति शब्दगतस्य आप्तोक्तत्वस्य ज्ञानादेव समीचीनः प्रत्ययः भवति। अनुमानस्थले तु न तथा भवति प्रवृत्तिभेदस्य सद्भावात् शब्दस्य अनुमानातिरिक्तप्रमाणत्वमिति तदर्थः। एवं च सूत्रद्वयोक्तशङ्काद्वयनिरासो जातः । यदुक्तं ‘सम्बन्धाच्चे'ति तत्र भाष्यकाराणां समाधानं एवं वर्तते यत् शब्दार्थयोः सम्बन्धः कश्चित् अङ्गीक्रियते, प्राप्तिरूपस्तु सम्बन्धो नाङ्गीक्रियते। प्राप्तिर्नाम संयोगः एकार्थसंयोगः समवायो वा। कुतो नाङ्गीक्रियत इति चेत् - प्रत्यक्षतस्तावच्छब्दार्थप्राप्तिः न उपलभ्यते, स्वर्गादिरूपस्यार्थस्य अतीन्द्रियत्वात् । अपि च यदि शब्दार्थयोः प्राप्तिलक्षणः सम्बन्धः स्यात् तदा शब्दान्तिके वा अर्थः स्यात् अर्थान्तिके वा शब्दः स्यात् उभयं वा उभयत्र स्यात्। तत्र नाद्यः पक्षः युक्तः इत्याह - "पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः"[5] इति। यदि शब्दान्तिकेऽर्थः स्यात् तदा अन्नम् इति शब्दोच्चारणे सति अन्नरूपस्यार्थस्य प्राप्त्या तेन उदरपूरणं स्यात्, अग्निः इति शब्दोच्चारणे सति अग्निरूपार्थप्राप्त्या तेन शरीरदाहः स्यात्, असिः इति शब्दोच्चारणे सति खड्गरूपस्यार्थस्य प्राप्त्या तेन शरीरस्य छेदनं स्यात्। अर्थान्तिके शब्द इति द्वितीयः पक्षो न युक्तः, स्थानकरणाभावादिति चशब्देन सूच्यते। स्थानं कण्ठादि, करणं प्रयत्नविशेषः। अर्थान्तिके स्थानप्रयत्नविशेषयोरनुपपत्त्या शब्दस्य उच्चारणं न सम्भवतीति नार्थान्तिके शब्दःभवितुं अर्हति । उभयप्रतिषेधाच्च ‘उभयं वोभयत्र' इति तृतीयपक्षोऽपि न युक्तः। एतावता प्राप्तिलक्षणः सम्बन्धः शब्दार्थयोः निराकृतः। सम्बन्धस्तु कश्चिदस्त्येव। अन्यथा – अमुकशब्दात् अमुक एवार्थोऽवगम्यत इति व्यवस्थाया अनुपपत्तेः इत्याह – “शब्दार्थव्यवस्थानादप्रतिषेधः"[6] इति। सम्बन्धस्येति शेषः । अस्ति च शब्दार्थयोः सम्बन्धोऽनुज्ञातः, अस्ति च प्रतिषिद्धः । अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः। प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः' इति वदद्भिः भाष्यकारैः वाच्यवाचकभावरूपः सम्बन्धः स्वीकृतः। कस्तर्हि शब्दार्थयोः सम्बन्धः इत्याशङ्कायामुक्तवान् – "न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य"[7] इति। अत्र भाष्यम् – "न सम्बन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि। समयकारितम्। यत्तदवोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः समयं तमवोचाम" इति। अनेन शब्दार्थयोः न प्राप्तिः सम्बन्धः, अपि तु समयः इत्युक्तं भवति। कोऽसौ समयः इत्याशङ्क्य भाष्यकारेणोक्तम् – “अस्य शब्दस्येदमर्थजातमभिधेयमिति चाभि धानाभिधेयनियमनियोगः" इति।

इतश्च सामयिकः शब्दादर्थसंप्रत्ययः, न स्वाभाविकः, “जातिविशेषे चानियमात्"[8] शब्दार्थप्रत्ययः समयकृतः, न स्वाभाविकः। ऋष्यार्यम्लेच्छानां यथेच्छं। अर्थबोधनार्थं शब्दप्रयोगो दृश्यते। आर्या हि यवशब्दात् दीर्घशूकविशेषं प्रतियन्ति, म्लेच्छास्तु कङ्गुमिति इदमनियतार्थकत्वं न स्याच्छब्दस्य स्वाभाविकसम्बन्धेनार्थ बोधकत्वे। जातिशब्देन दीर्घशूकत्वादयः गृह्यन्ते। न्यायमञ्जरीकारास्तु जातिशब्देनात्र देशो विवक्षितः। क्वचिद्देशे कश्चिच्छब्दः देशान्तरप्रसिद्धमर्थमुत्सृज्य ततोऽर्थान्तरं बोधयति। यथा तस्करवाचकः चोरशब्दः दाक्षिणात्यैः ओदने प्रयुज्यते । एतच्चार्थस्य सामयिकत्वपक्षे युज्यते। नित्ये तु सम्बन्धेऽर्थव्यभिचारो न स्यात्।।

न्यायवार्तिककारैः – “आप्तोपदेशसामर्थ्याच्छब्दार्थसंप्रत्ययः" इति सूत्रव्याख्यानावसरे – “अस्ति शब्दार्थयोः सम्बन्धः अनुज्ञातः,

अस्ति च प्रतिषिद्धः । वाच्यवाचकभावलक्षणः सम्बन्धोऽनुज्ञातः, अस्य शब्दस्यायमर्थो वाच्य इति। यः पुनरयं स्वाभाविकः शब्दार्थयोः सम्बन्ध इति कैश्चिदुच्यते स प्रतिषिद्ध इति" इत्युक्तम्। अनेन मीमांसकवत् न स्वाभाविकः वाच्यवाचकभावः अपि तु ईश्वरेच्छारूपसमयकृतः स सम्बन्धः शब्दार्थयोः नैयायिकानामिति प्रतीयते।

**शब्दार्थसम्बन्धः समयः सङ्केतरूप एव ।**

अत्रायं राद्धान्तः - अस्येदमिति षष्ठीविशिष्टवाक्यप्रतिपाद्यः यः सम्बन्धः वाच्यवाचकभावरूपः स किं समयरूपः अथवा समयकृतः अन्यः इति । समयशब्दार्थश्च कः? इति।"यत्तदवोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः सम्बन्ध इति, समयं तमवोचाम" इति भाष्यपर्यालोचने वाच्यवाचकभावः न समयातिरिक्त इति सुष्ठु वक्तुं शक्यते । सम्बन्धवादिनापि चायमवर्जनीयः' इति भाष्येण "अयं च वाच्यवाचकभावलक्षणः सम्बन्धः स्वाभाविकशब्दार्थसम्बन्धवादिनाप्यनुज्ञेयः इति वार्तिकेन च समयोऽवश्यमभ्युपगन्तव्य इत्युक्तम्।कुतः इत्याकाङ्क्षायाम् न हि स्वाभाविकसम्बन्धवादिनोऽनुपयुक्तशब्दार्थसम्बन्धस्य शब्दग्रहणाद्विशेष प्रत्ययो भवति" इति वार्तिककारेणोक्तम्। 'अयमस्य वाचकः' इति वा "अस्मादयं बोद्धव्य इति वा सङ्केतं यः जानाति स एव शब्दार्थयोः स्वाभाविक सम्बन्धं ज्ञातुं शक्नोति नान्यथा। असति सङ्केते घटशब्दकम्बुग्रीवादिमतोरेव सम्बन्धः न घटशब्दपटयोरिति कथं व्यवस्थापयितुं शक्यतेति वार्तिकाशयः । तात्पर्यटीकायाम् एवं प्रतिपाद्य निरूपितम् । शब्दार्थयोः स्वाभाविकः सम्बन्धः तादात्म्यरूपो वा प्रत्याय्यप्रत्यायकभावो वा प्राप्तिरूपो वा (संयोगरूपः)। प्रत्यक्षलक्षणसूत्रस्थेन अव्यपदेश्यपदेन तादात्म्यं शब्दार्थयोः निराकृतम्। प्राप्तिनिराकरणहेतुनैव प्रत्याय्यप्रत्यायकभावोऽपि निराकृतः । प्राप्तिरूपस्तु सम्बन्धः 'पूरणप्रदाहपाटनानुपलब्धेश्च' इति सूत्रकारेण भाष्यकारेण च निराकृतः। परिशेषात् समय एव सम्बन्धः। कोऽयं समयः अभिधानाभिधेयनियमनियोगः। अभिधानाभिधेययोर्नियमः गोशब्दस्य सास्नादिमानेवार्थः एवमश्वशब्दस्य केसरादिमानेवेति व्यवस्था। तस्मिन्नियोगः बोद्धव्य इति भगवतः परमेश्वरस्य सर्गादौ, सोऽयं समयः। तस्मिन्नुपयुक्ते ज्ञाते शब्दार्थव्यवस्था भवति। सम्बन्धवादिनोऽपि चायमवर्जनीय इति। येऽपि मीमांसका वैयाकरणा वा स्वाभाविकं शब्दार्थयोः सम्बन्धमास्थिषत, तेषामपि सम्बन्धः नैव सत्तामात्रेण गमकः अपि तु ज्ञातः सन्। विज्ञाने च अयमस्य वाचक इति वा अस्मादयं बोद्धव्य इति वा सङ्केत एवोपायः शरणीकर्तव्यः। वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत् सङ्केतपूर्व एव। तद्वरमस्तु सङ्केत एव। कृतमत्र स्वाभाविकेन सम्बन्धेन। सङ्केतादेव प्रयोग-प्रतिपत्ति-व्यवहाराणामुपपत्तेः इति।।

अनेनापि शब्दार्थयोः सङ्केत एव सम्बन्ध इति स्पष्टम्। शब्दार्थयोः स्वाभाविकसम्बन्धनिराकरणाय प्रवृत्तं जातिविशेषे चानियमात्' इति सूत्रं तात्पर्यटीकायामेवं व्याख्यातम्। स्वाभाविको हि सम्बन्धः कस्यचिच्छब्दस्य केनचिदर्थेनास्ति, न सर्वस्य सर्वेण । तथा सति अस्य शब्दस्यायमर्थ इति व्यवस्था न स्यात्। तथा च ऋष्यार्यम्लेच्छानां अर्थविशेषनियमो न स्यात्। तथा हि यवशब्दः आर्यैः दीर्घशूके पदार्थे प्रयुज्यते। म्लेच्छैस्तु प्रियङ्गौ। एवं त्रिवृच्छब्दम् ऋषयः स्तोत्रीयानवके प्रयुञ्जते, आर्यास्तु लताविशेषे। सोऽयमनियमो न स्यात् स्वाभाविके सम्बन्धे। न हि स्वभावतो रूपेण सम्बद्धः आलोकः सहस्रेणापि शिल्पिभी रसादिसम्बद्धः कर्तुं शक्यः। यतस्ततो रसादयो गम्येरन्। नापि तत्र सङ्केतेन स्वाभाविकः सम्बन्धो व्यज्यते। असत्त्वात्। सदेव हि व्यज्यते नासत्। न खलु यत्र घटो नास्ति तत्र तं प्रदीपः शक्तो व्यङ्कुम्। सोऽयमनियमः शब्दार्थप्रत्ययस्य सामयिकत्वे युज्यते, पुरुषेच्छाधीनत्वात्, तस्याश्चानियमात्। न च वाच्यं सर्व एव शब्दाः सर्वैरेवार्थैः स्वभावतः सम्बद्धाः, सङ्केतवशात्तु अर्थविशेषनियता इति। प्रमाणाभावात्। जातिभेदेनार्थभेदप्रत्ययस्तु सङ्केतभेदादप्युपपद्यते इति। एवं च जातिशब्दः यथा श्रुतपरतयैव भाष्यकारेण च व्याख्यातः । वार्तिककारेण जयन्तभट्टेन च

देशपरतया व्याख्यातः । तत्र कारणमुक्तं तात्पर्यटीकायाम् – नन्वार्यदेशवर्तिनां म्लेच्छानामार्य व्यवहारनिश्चितसङ्केतानां नानियम इत्यत आह वार्तिककार: – जातिविशेषशब्देन देशोऽभिधीयत इति।

अभिधानाभिधेयनियमनियोग इत्यत्र नियोगशब्द:'सङ्केतेन तु नियम्यन्ते' इत्यादिटीकाग्रन्थात् सङ्केतपर्यायःअवश्यं अङ्गीकार्यः । । सङ्केतोऽपि इच्छारूपः। 'सोऽयमनियमः सामयिकत्वे उपपद्यते, पुरुषेच्छाधीनत्वात्' इति टीकाव्यवहारात्। अतः दर्शिताभिः युक्तिभिः शब्दार्थसंबन्धः ईश्वरसंकेतरूपः इति व्यवस्थापितम् न्यायनये इति शम्।

## सहायग्रन्थसूची

1. न्या.सू.2.1.49.
2. न्या.सू.2.1.50.
3. न्या.सू.2.1.51.
4. न्या.सू.2.1.52.
5. न्या.सू.2.1.53.
6. न्या.सू.2.1.54.
7. न्या.सू.2.1.55.
8. न्या.सू.2.1.56.

## सहायग्रन्थसूची


1. न्यायकोशः - झळकीकरभीमाचार्यरचितः, अभ्यंकरोपाह्व वासुदेवशास्त्रिणा समुपब्रुंहितः संशोधितश्च (Bombay Sanskrit and Prakrit Sereies No. 49) भण्डार्कर् प्राच्यविद्यासंशोधनालयः, पूणे, 1996 (चुतुर्थसंस्करणस्य मुद्रणप्रतिकृतिः).
2. न्यायभाष्यम् - वात्सायनमुनिप्रणीतम्, बोद्धभारती, वाराणसी, 1998.
3. न्यायवार्तिकम्, गोतमकृतम्, -
   a. (प्रथमोभागः) वात्सायनकृतभाष्य – उद्योतकरकृतवार्तिक – वाचस्पतिमिश्रकृत टीका – उदयनकृत परिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्तलालठक्कुरः, मिथिलाविद्यापीठम्, (Mithila Institute Series, Ancient Text No. 20), दर्भाङ्गा, 1967.
   b. विश्वनाथीयवृत्ति – वात्सायनबाष्यसहितम्, न्यायसूचीनिबन्धोपेतम्, संपा. एल्. एस्. द्रविड, टि. एस्. भण्डारी, वि.पि.द्विवेदी, (काशीसंस्कृतसिरीज् सं. 43.), वाराणसी, 1920.
4. न्यायवार्तिकतात्पर्यटीका -
   a. (प्रथमोभागः) वात्सायनकृतभाष्य – उद्योतकरकृतवार्तिक – वाचस्पतिमिश्रकृत टीका – उदयनकृत परिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्तलालठक्कुरः, मिथिलाविद्यापीठम्, (Mithila Institute Series, Ancient Text No. 20), दर्भाङ्गा, 1967.
   b. संपा. राजेश्वरशास्त्रिद्रविडः, (चौखम्बासंस्कृतग्रन्थमाला सं. 24) वाराणसी, 1925.
5. न्यायवार्तिकटीकापरिशुद्धिः- (प्रथमोभागः)वात्सायनकृतभाष्य–उद्योतकरकृतवार्तिक– वाचस्पति-मिश्रकृत टीका – उदयनकृत परिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्तलालठक्कुरः, मिथिलाविद्यापीठम्, (Mithila Institute Series, Ancient Text No. 20), दर्भाङ्गा, 1967.